श्रीमते रामानुजाय नमः

**श्रीपराशरभट्टार्यैरनुगृहीतं मुक्तकश्लोकात्मकं**

# ॥ श्रीरङ्गनाथस्तोत्रम् ॥

श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः।
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे॥

सप्तप्राकारमध्ये सरसिज मुकुलोद्भासमाने विमाने
कावेरी मध्य देशे मृदुतरफणिराड्भोगपर्यङ्कभागे।
निद्रामुद्राभिरामं कटिनिकटशिरःपार्श्वविन्यस्तहस्तं
पद्माधात्रिकराभ्यां परिचितचरणं रङ्गनाथं भजेऽहम्॥ १

कस्तूरीकलितोर्ध्वपुण्ड्र तिलकं कर्णान्तलोलेक्षणं
मुग्धस्मेर मनोहराधरदलं मुक्ताकिरीटोज्ज्वलम्।
पश्यन्मानस पश्यतोहररुचः पर्यायपङ्केरुहं
श्रीरङ्गाधिपतेः कदा नु वदनं सेवेय भूयोऽप्यहम्॥ २

कदाऽहं कावेरीतट परिसरे रङ्गनगरे
शयानं भोगीन्द्रे शतमखमणि श्यामलरुचिम्।
उपासीनः क्रोशन् मधुमथन! नारायण! हरे!
मुरारे! गोविन्देत्यनिशमपनेष्यामि दिवसान्॥ ३

कदाऽहं कावेरी विमलसलिले वीतकलुषो
भवेयं तत्तीरे श्रममुषि वसेयं घनवने।
कदा वा तं पुण्ये महति पुलिने मङ्गलगुणं
भजेयं रङ्गेशं कमलनयनं शेषशयनम्॥ ४

पूगीकण्ठद्वय ससरसस्निग्ध नीरोपकण्ठां
आविर्मोदस्तिमितशकुनानूदित ब्रह्मघोषाम्।
मार्गे मार्गे पथिकनिवहैरुञ्छ्यमानापवर्गां
पश्येयं तां पुनरपि पुरीं श्रीमतीं रङ्गधाम्नः॥ ५

न जातु पीतामृतमूर्च्छितानां
नाकौकसां नन्दनवाटिकासु।
रङ्गेश्वर! त्वत्पुरमाश्रितानां
रथ्याशुनामन्यतमो भवेयम्॥ ६

असंनिकृष्टस्य निकृष्टजन्तोः
मिथ्यापवादेन करोषि शान्तिम्।
ततो निकृष्टे मयि संनिकृष्टे
कां निष्कृतिं रङ्गपते! करोषि॥ ७

श्रीरङ्गं करिशैलमञ्जनगिरिं तार्क्ष्याद्रि सिंहाचलौ
श्रीकूर्मं पुरुषोत्तमं च बदरीनारायणम् नैमिशम्।
श्रीमद्वारवती प्रयागमथुरायोध्यागयाः पुष्करं
सालग्रामगिरिं निशेव्य रमते रामानुजोऽयम् मुनिः॥ ८

**॥ इति श्रीरङ्गनाथस्तोत्रं सम्पूर्णम्॥**